घ "भो वासव! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि। सः दीन इति जानन्नपि कृषकः तं बहुधा पीडयति। सः कृच्छ्रेण भारमुद्वहति। इतरमिव धुरं वोढुं सः न शक्नोति। एतत् भवान् पश्यति न?" इति प्रत्यवोचत्।

"भद्रे! नूनम्। सहस्राधिकेषु पुत्रेषु सत्स्वपि तव अस्मिन्नेव एतादृशं वात्सल्यं कथम्?" इति इन्द्रेण पृष्टा सुरभिः प्रत्यवोचत्– *(पृष्ठ 40)*

प्रश्नाः—

I. एकपदेन उत्तरत—

(*i*) *कः कृच्छ्रेण भारम् उद्वहति?*

(*ii*) *पुत्रस्य दैन्यं दृष्ट्वा का रोदिति?*

II. पूर्णवाक्येन उत्तरत—

इन्द्रः सुरभि किम् अपृच्छत्?

III. निर्देशानुसारम् उचितम् उत्तरम् प्रदत्तविकल्पेभ्यः चित्वा लिखत—

(*i*) *'सुरभिः' इति पदस्य विशेषणपदं किम्?*

(क) पृष्टा (ख) वात्सल्यं (ग) इति (घ) इन्द्रेण

(*ii*) *'भवान्' इति सर्वनामपदं कस्मै प्रयुक्तम्?*

(क) इन्द्रः (ख) वृषभः (ग) सुरभिः (घ) इन्द्राय

(*iii*) *'सरलतया' इति पदस्य विपरीतार्थकं पदम् किम्?*

(क) दैन्यं (ख) कृच्छ्रेण (ग) वोढुं (घ) बहुधा

(*iv*) *'पीडयति' इति क्रियापदस्य कर्तृपदं किम्?*

(क) कृषकः (ख) सः (ग) दीनः (घ) वृषः

उत्तराणि—

I. (*i*) वृषभः (*ii*) सुरभिः माता

II. "सहस्राधिकेषु पुत्रेषु सत्स्वपि तव अस्मिन्नेव एतादृशं वात्सल्यं कथम्?" इति इन्द्रः सुरभिम् अपृच्छत्।

III. (*i*) (क) पृष्टा (*ii*) (घ) इन्द्राय

(*iii*) (ख) कृच्छ्रेण (*iv*) (क) कृषकः